त्रयोदशः पाठः

# यक्षयुधिष्ठिर-संवादः

CTV74Y



**यक्ष उवाच**

किंस्विद् गुरुतरं भूमेः किंस्विदुच्चतरं च खात्।

किंस्विच्छीघ्रतरं वायोः किंस्विद् बहुतरं तृणात्।।1 ।।

**युधिष्ठिर उवाच**

माता गुरुतरा भूमेः खात् पितोच्चतरस्तथा।

मनः शीघ्रतरं वाताच्चिन्ता बहुतरी तृणात्।।2।।

**यक्ष उवाच**

कः शत्रुर्दुर्जयः पुंसां कश्च व्याधिरनन्तकः।

कीदृशश्च स्मृतः साधुरसाधुः कीदृशः स्मृतः।।3।।

**युधिष्ठिर उवाच**

क्रोधः सुदुर्जयः शत्रुर्लोभो व्याधिरनन्तकः।

सर्वभूतहितः साधुरसाधुर्निर्दयः स्मृतः ।।4।।

शब्दार्थः

**किंस्वित्** = कौन। **खात्** = आकाश से। **बहुतरम्** = अपेक्षाकृत अधिक। **प्रवसतः** = परदेश में रहने वाले का। **आतुरस्य** = रोगी का। **दुर्जयः** = कठिनाई से जीतने योग्य। **पुंसाम्** = मनुष्यों का। **अनन्तकः** = कभी अन्त न होने वाला। **सर्वभूतहितः** = सभी प्राणियों का हित करने वाला।अभ्यासः

**1. उच्चारणं कुरुत पुस्तिकायां च लिखत-**

किंस्विदुच्चतरम् किंस्विच्छीघ्रतरम् पितोच्चतरस्तथा वाताच्चिन्ता

शत्रुर्दुर्जयः व्याधिरनन्तकः साधुरसाधुनिर्दयः

**2. अधोलिखितान् यक्षस्य प्रश्नान् युधिष्ठिरस्य च उत्तराणि पठित्वा मननं कुरुत-**

**यक्षस्य प्रश्नानि यधिरिष्ठरस्य उत्तराणि**

1. भूमेः गुरुतरं किंस्वित् ? 1. भूमेः गुरुतरा माता।

2. खात् उच्चतरं च किंस्वित् ? 2. पिता खात् उच्चतरः।

3. वायोः शीघ्रतरं किंस्वित् ? 3. वातात् शीघ्रतरं मनः।

4. तृणात् बहुतरं किंस्वित् ? 4. तृणात् बहुतरी चिन्ता।

5. पुंसां दुर्जयः शत्रुः कः ? 5. (पुंसाम्) दुर्जयः शत्रुः क्रोधः।

6. (पुंसाम्) अनन्तकः व्याधिः कः ? 6. (पुंसाम्) अनन्तकः व्याधिः लोभः।

7. साधुः कीदृशः स्मृतः ? 7. सर्वभूतहितः साधुः स्मृतः।

8. असाधुः कीदृशः स्मृतः ? 8. निर्दयः असाधुः स्मृतः।

**ध्यातव्यम्**

भूमःे गुरुतरा माता (भूमि की अपेक्षा माता महान् है) अपेक्षाशब्देन कृतायां तुलनायां पञ्चमी विभक्तिः

भवति। तरप् (तर)-प्रत्ययान्तशब्दाः विशेषणरूपे प्रयुक्ताः भवन्ति, यथा- उच्चतरम्, महत्तरम्,

पटुतरम् इत्यादयः।

**3. संस्कृतभाषायाम् अनुवादं कुरुत -**

(क) देवदत्त प्रभाकर की अपेक्षा चतुर है।

(ख) यह मिठाई उस मिठाई से मधुर है।

(ग) विन्ध्याचल से हिमालय ऊँचा है।

(घ) ज्ञान से आचरण श्रेष्ठ है।

(ङ) नीम से नारियल बड़ा है।

**4. उपयुक्तकथनानां समक्षम् 'आम्' अनुपयुक्तकथनानां समक्षम् 'न' इति लिखत -**

(क) माता भूमेः गुरुतरा अस्ति। ..............................

(ख) मनः वातात् शीघ्रतरं न। ..............................

(ग) आतुरस्य धनं मित्रम्। ..............................

(घ) दुर्जयः शत्रुः क्रोधः ..............................

(ङ) निर्दयः असाधुः स्मृतः। ..............................

**5- अधोलिखितपदानि प्रयुज्य वाक्यरचनां कुरुत-**

यथा- उवाच यक्षः युधिष्ठिरम् उवाचः।

कीदृशः, माता, क्रोधः

**6-निम्नलिखितपदानां विलोमपदं लिखत-**

यथा- गुरुतरम् - लघुतरम्

मूर्ख, नास्तिकः, शत्रुः, साधुः।

**7-रेखांकितपदानि अधिकृत्य प्रश्ननिर्माणं कुरुत-**

यथा-भूमेः गुरुतरा माता। भूमेः गुरुतरा का ?

(क) पिता खात् उच्चतरः।

(ख) निर्दयः असाधुः स्मृतः।

(ग) सर्वभूतहितः साधुः स्मृतः।

**शिक्षण-सङ्केतः-**

1. शिक्षकः अस्मिन् संदर्भे सन्दर्शिकायाः अवलोकनं कुर्यात्।
2. महाभारते आगतस्य यक्ष-युधिष्ठिर-संवादस्य चर्चां कुर्यात्।

**वदतु संस्कृतम्-**



**खेलितुं मित्रेण सह अनुरोधः**

**किशोरः** कौशल! खेलितुं चलिष्यसि ?

**कौशलः** अवश्यं चलिष्यामि।

**किशोरः** आम्, खेलने तु तव मन एव लगति। तर्हि आगच्छ।

**कौशलः** चलामि जलपानं कृत्वा। आगच्छ, कि□चत् त्वमपि जलपानं कुरु।

**किशोरः** अहन्तु इदानीम् एव कृत्वा आगच्छामि।

**कौशलः** अस्तु, अहमपि सज्ज एव जातः। इदानीं चलितव्यम्। कन्दुकं वर्तते ?

**किशोरः** कन्दुकं तु मम वर्तते परं वायुः निर्गतः अस्ति। त्वं आत्मनः कन्दुकं गृहाण।

**कौशलः** कथं वायुः निर्गतः ?

**किशोरः** गतदिने खेलनकाले एकेन कण्टकेन कन्दुकम् अपविद्धम्।

**कौशलः** अस्तु, तर्हि अवश्यमेव आनयामि। परं कदाचित् इदमपि अपविद्धं न जायेत।

**किशोरः** नहि, अद्य कण्टकानि अपनीय खेलिष्यामः।

**कौशलः** तदा शोभनं भविष्यति। चलतु। अहं कन्दुकं गृहीत्वा अनुपदमेव आगच्छामि।

विशेषः- संस्कृते सम्भाषण-कौशलस्य विकासाय उपयुक्त-पुस्तकानाम् उपयोगं कारयत।